# संस्कृत (संस्कृतम्)

## प्रथम प्रश्न पत्र : (नाटकं, प्राचीनकाव्यं, संस्कृतसाहित्यस्य इतिहासः)

समयावधि : घण्टात्रयम् पूर्णाङ्का : 100

1. निम्नलिखित श्लोकानां संदर्भसहितः अनुवादः करणीयः –

(क) ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा,
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति।।

अथवा

शमप्रधानेषु तपोधनेषु,
गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्ता-
स्तदन्यतेजोऽभिभवाद् वमन्ति।।

http://questionpaperesult.com/

Scanned by CamScanner

(ख) तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।
विसृजति हिमगर्भैरग्निमिन्दुर्मुयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि।

अथवा

आचार इत्यवहितेन माया गृहीता:,
या वेत्रयष्टिरवरोधगृहेषु राज्ञः।
काले गते बहुतिथि मम सैव जाता,
प्रस्थान विक्लवगतेरवलम्बनार्था।

2. अधोलिखितानां श्लोकानां ससन्दर्भा व्याख्या करणीया -

(क) माविष्कृतोऽरूणपुरःसर एकतोऽर्कः।-
माविष्कृतोरवरोधागृहेषु राज्ञः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु।।

अथवा

शुश्रुषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने,
भर्तुविपप्रकृताऽपि रोपणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दिक्षणा परिजने भाग्येष्वनुत्सेकिनी,
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।।

(ख) सरसिजमनुविद्धं शैवलेनापि रम्यं,
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी,
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।

अथवा

स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत्ऊलमेव पुण्यं।
असंनिवृत्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः।।

3. अभिज्ञानशाकुन्तलमधिकत्य केषाञ्चित् पञ्च प्रश्नानां संस्कभाषया उत्तर देयम् -

(क) भवितव्यानां द्वाराणि कुत्र भवन्ति?
(ख) वैखानसः दुष्यन्तं कं आशीर्वाद दत्तवान्?
(ग) तपोवनानि केन वेषेण प्रवेष्टव्यानि?
(घ) केन कारणेन विदुषकः नगरं गतवान्?
(ङ) शकुन्तलायाः मातुः किं नाम आसीत्?
(च) दुष्यन्तस्य कृते के द्वे प्रतिष्ठे?
(छ) दुष्यन्तेन शकुन्तलया सह केन विधिना विवाहः कृतः?
(ज) शकुन्तला सगर्भ अस्ति इति वार्ता कण्वेन कथं ज्ञाता?
(झ) शकुन्तलायाः कृते आभारणानि केन दत्तानि?

http://questionpaperesult.com/

Scanned by CamScanner

(ञ) दुष्यन्तस्य पुत्रस्य किं नाम आसीत् ?

4. अधोलिखितानां छन्दसां केषाञ्चित् त्रयाणां लक्षणमुदाहरणं लक्षणसङ्गतिं च विवेचनीयम् –
(1) इन्द्रवज्रा (2) मालिनी (3) पुष्पिताग्रा (4) मन्दाक्रान्ता (5) वंशस्थ (6) शिखरिणी।

5. रामायण इति वीरकाव्यस्य सांस्कृतिकं महत्त्वं लिखन्तु।

अथवा

कालिदासः सर्वश्रेष्ठः नाटककारः अस्ति इति विषयमधिकृत्य एकं निबन्धं लिखन्तु।

6. अधोलिखितेषु कयोः द्वयोः टिप्पणी लिखन्तु –
(क) शिशुपालवधम् (ख) कादम्बरी
(ग) गीतगोविन्दम् (घ) बृहत्कथा

7. केषाञ्चित् पञ्च प्रश्नानाममुत्तराणि संस्कृतमाध्यमेन लिखन्तु–
(क) आदिकविः कः अस्ति ?
(ख) भासस्य प्रसिद्धनाटकानि कति सन्ति ?
(ग) करुणरसप्रधाननाटकस्य नाम लिखन्तु।
(घ) पञ्चतन्त्रे कति भागाः सन्ति ?
(ङ) महाभारते कति पर्वाणि सन्ति
(च) रघुवंशे कति सर्गाः सन्ति
(छ) बुद्धचरितम् महाकाव्यस्य रचयिता कः अस्ति ?
(झ) बृहत्त्रयी का अस्ति ?
(ञ) बिल्हण कवेः ऐतिहासिक महाकाव्यस्य नाम किम् अस्ति ?

8. केषाञ्चित् पञ्च पदानां प्रकृतिप्रत्ययौ लेखनीयौ –
(क) वीक्ष्य (ख) सृष्टिः (ग) दयामानाः (घ) अनुपतति (ङ) छिन्नम् (च) हन्तव्यः
(छ) प्रहर्तुम् (ज) स्तुत्यः (झ) देयम् (ञ) स्थितः

http://questionpaperesult.com/

Scanned by CamScanner